सिद्धगुरुः श्रीशम्भुनाथः

डॉ. बलजिन्नाथपण्डितः

शैवदर्शनविशेषज्ञः

५१, आदर्शनगरम्, वनतालाब,

जम्मू

(सारस्वत्याः सुषमायाः ५१ व. १-४ अ. प्रतिमुद्रणम्)

ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुन-पूर्णिमाः, वि.सं. २०५३

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वाराणसी-२२१००२ [उ.प्र.]

सिद्धगुरुः श्रीशम्भुनाथः

डॉ. बलजिन्नाथपण्डितः
शैवदर्शनविशेषज्ञः
५१, आदर्शनगरम्, वनतांलाब,
जम्मू

❀ ❀ ❀

शैवाचार्येषु सर्वोत्कृष्टाः शास्त्रतत्त्वज्ञाः काश्मीरशैवदर्शनविषये विविध-प्रकारकग्रन्थनिर्मातारोऽभूवन् भट्टकल्लट-सोमानन्दोत्पलदेवाभिनवगुप्तप्रभृतयः। एतेषां ग्रन्थेषु दर्शनविद्यायास्तथाविधानां रहस्यभूतानां दर्शनतत्त्वानां साधना-प्रक्रियाणां च प्रतिपादकाः सिद्धान्ताः प्रक्रियाश्च सामान्यतो विदुषामप्यगम्याः, केवलं शिवानुग्रहशक्तिपातपवित्रितानामेव साधकोत्तमानां सिद्धजनानां चाभ्यासविषयता-मुपगच्छन्ति, न साधारणविदुषाम्।

कलिकाले सिद्धजनानां दुर्लभत्वात् ते रहस्यभूताः सिद्धान्ता भारतस्य सुसमृद्धेषु विद्यापीठेषु प्रायशस्तथा विद्याभ्यासविषयतां नोपगता यथा व्याकरण-नव्यन्याय-प्रभृतयो विषयाः। वर्तमाने पुनर्युगे केचन शोधकारिणो विद्वांसः समुत्कृष्टोपाधिलब्ध्यर्थं कस्यापि सामान्यतोऽप्रथितस्य विषयस्य ग्रन्थादेर्वा, शास्त्रतत्त्वविशेषस्य वा प्रकाशनप्रख्यापनाद्यर्थं तेषां सिद्धान्तानां तासां साधनाप्रक्रियाणां चाध्ययनाध्यापन-ग्रन्थलेखनाद्यभ्यासे प्रवृत्तिं लभन्ते, परं तेषां ग्रन्थरत्नानां रहस्यं त एव विरलविरला मनीषिणो यथार्थतयाऽवबोधने समर्था ये पारमेश्वरानुग्रहशक्तिपाततः पवित्रीकृतान्तरात्मानः।

प्राक्तनेषु कालेषु ये तेषां ग्रन्थानां सम्यग् बोद्धारोऽभूवन्, तैः कृता ग्रन्था नेदानीं सर्वाङ्गतया लभ्यन्ते। केचन पुनः सर्वथा लोपमेव गताः। उदाहरणतः— शिवसूत्राणां भट्टकल्लटकृता तत्त्वार्थचिन्तामण्याख्या व्याख्या सारभूतस्य तत्त्वस्य यथार्थतया प्रकाशनकर्त्री न क्वापि दृष्टिगोचरा भवति। केवलं तस्याः कानिचिद् वाक्यानि तत्र तत्र समुद्धृतानि लभ्यन्ते।

वस्तुतः प्राक्तनैः सिद्धैरतीव रहस्यभूताः शास्त्रप्रक्रिया नैव सम्यक् स्पष्टीकृताः, यतोऽनधिकारिणां हस्तगतास्ता दुरुपयोगेषूपयुक्ताः सत्यो जगतो हानिमेव सम्पादयेयुरिति कृत्वा।

उक्तं ह्येतद्विषयेऽभवत् स्पष्टमभिनवगुप्तस्य गुरुणा श्रीशम्भुनाथेन, यथा—'नातिरहस्यमेकत्र ख्याप्यं न चाप्यत्यन्ततो गोप्यमिति ह्यस्मद्गुरवः' इत्येवम् (तं.सा., पृ. ३१)। तथैव च तन्त्रालोकेऽप्युक्तं करणयोगमधिकृत्य—

गुरुवक्त्राच्च बोद्धव्यं करणं यद्यपि स्फुटम्।
तथाप्यागमरक्षार्थं तदग्रे वर्णयिष्यते।। (तं.आ., ५।१३०-१३१)

इत्युक्त्वाऽप्यग्रे न क्वापि स्पष्टीकृता करणयोगप्रक्रिया; अनधिकारिजनहस्तगता सतीयं दुरुपयोगग्रस्ता मा भवैदिति कृत्वा।

भट्टकल्लटमहोदयैः स्पन्दकारिकाः सरलसरलैः सुस्फुटार्थैश्च पद्यैर्निर्मिताः सत्योऽपि रहस्यमय्य एव। तासां शाब्दी रचना तु स्फुटार्था, परं तासु कारिकासु सङ्केतिता योगाभ्यासप्रक्रियाः सिद्धगुर्वनुग्रहमात्रगम्याः। इत्थं काश्मीरशैवदर्शनस्य साधनाप्रक्रिया अतीवरहस्यमय्यः सत्यो नैव पूर्वगुरुभिः सुस्पष्टतां नीताः, कदाचिदनधिकारिजनहस्तगताः सत्यो जगतो व्यवस्थां भ्रंशयेयुरिति विचार्य। एषा नीतिः सुदृढमनुसृता भट्टकल्लटादारभ्य श्रीमदुत्पलदेवं यावत् सर्वैरपि महागुरुभिः। अग्रे च यावन्मात्रं शास्त्ररहस्यं प्रकटितं सदपि नैव विशेष-दुरुपयोग-विषयतामुपगच्छेत्, तावन्मात्रं स्पष्टीकरणं कृतं केवलमभिनवगुप्तपादाचार्यमहोदयैरेव स्वकीयेषु मालिनीविजयवार्तिकादिग्रन्थेषु।

तन्त्रालोकेऽपि तैरेषैव नीतिः सुप्रयुक्ता, तथापि यावन्मात्रं स्पष्टीकरणं कृतं सन्न सिद्धजननीतिविरुद्धतामुपगच्छेत्, तावन्मात्रं तत् सम्पादितमेव तैः स्वकीयेषु मूलग्रन्थेषु टीकाग्रन्थेषु च। तत एवाभिनवगुप्तपादाचार्या एवातिप्रकाण्डाः शास्त्रजातरहस्यविदः सन्तस्तत्तद्रहस्यप्रकाशकत्वेनाद्वितीया विद्वांसः समस्तशास्त्र-जातप्रसरणशीलधिषणाविभूषिताश्चेति विश्वत्र विद्वांसः स्वीकृतवन्तः, स्वीकुर्वाणाः स्वीकरिष्यन्तश्चेति विदाङ्कुर्वन्तु सन्मनीषिणः।

परमेतादृशाः सकलभोगमोक्षोभयपक्षीयशास्त्रतत्त्वमर्मज्ञाः श्रीमदभिनवगुप्त-महोदया अपि यं गुरुं प्रति बहुधा प्रशंसापूर्वकं नमस्यन्तस्तं स्मरन्त्यनेकदा समस्तशास्त्रतत्त्वनिष्णातस्य तस्य गुरोर्नाम कतिपय एव मनीषिणो विद्वांसोऽद्यत्वे

जानन्ति। असौ सुमहनीयो गुरुवरस्तावज्जालन्धरपीठेश्वरस्तत्रभवान् श्रीशम्भुनाथो यस्त्रिककौलोभयविधरहस्यसाधनासु सुनिष्णातः साक्षाच्छिव इव हि देहस्थः।

आचार्यश्रीमदभिनवगुप्तस्यानेकेषु ग्रन्थेषु यो माहात्म्येन सर्वोत्तीर्णोऽसौ ग्रन्थस्तावत् तन्त्रालोकाख्यः। एतस्मिन् ग्रन्थे तन्त्रशास्त्रप्रतिपादिता मूलभूता आगमिकदर्शनसिद्धान्ता विविधाश्चागमशास्त्रप्रतिपादिता योगसाधनप्रक्रियास्तथा सुस्पष्टतां नीताः सन्ति, यथा परमसत्यतत्त्वजिज्ञासवः पूर्णतया सुसन्तुष्टा भवन्ति। नास्ति तावत् सर्वस्मिन्नपि जगति तन्त्रालोकसमकक्षः कोऽपि ग्रन्थः क्वापि, न चापि वर्तते, अवर्तत, वर्तिष्यते वाऽभिनवगुप्ततुल्यः सर्वतोगतिः शास्त्रकारः क्वचित्।

केऽपि विरलविरला एव विद्वांस एतज्जानन्ति यदीदृशः सर्वशास्त्रनिर्माण-व्याख्यानादिप्रवीणो, बहूनां गुरूणामपि गुरुरसावभिनवगुप्तमहोदयः स्वगुरुं श्रीशम्भुनाथं कियता बहुमानपूर्वकेण भक्तिभावेनानेकदाऽनेकधा च स्वकीयेषु ग्रन्थरत्नेषु सादरं स्मरञ्जयति। तथा हि स्वकीये आगमिकदर्शनविज्ञानसाधना-प्रक्रियोभयप्रतिपादके, सर्वस्मिन्नपि जगत्यद्वितीयेऽनुपमे च तन्त्रालोकाख्ये ग्रन्थरत्ने गहनगहनानां तान्त्रिकयोगसाधनानां गूढतराणां च दर्शनरहस्यानां तत्त्वस्य व्याख्यानं प्रकुर्वाणा आचार्यमहोदयाः स्वकीयायाः शास्त्रदृष्टेः प्रामाण्यस्य प्रतिपादनार्थं श्रीमन्तं सिद्धगुरुं श्रीशम्भुनाथमेव तथोपदेशकत्वेन सबहुसमादरं बहुधा स्मरति।

प्रथमतः श्रीतन्त्रालोके प्रतिपादयिष्यमाणस्य तत्त्वविज्ञानस्य प्रामाणिकतां स्थापयितुं ग्रन्थारम्भे सशक्तिकं श्रीशम्भुनाथमेव जयकारपूर्वकं स्मरन्त्याचार्य-श्रीमदभिनवगुप्तमहोदयाः। तद्यथा—

> जयताज्जगदुद्धृतिक्षमोऽसौ भगवत्या सह शम्भुनाथ एकः।
> यदुदीरितशासनांशुभिर्मे प्रकटोऽयं गहनोऽपि शास्त्रमार्गः।।
>
> (तं.आ. १।१३)

असौ श्रीशम्भुनाथस्त्रिकसाधनानां कौलिकसाधनानां च पारङ्गतो गुरुरभवत्। तत एवात्र पद्येऽसौ भगवत्याख्यया तस्य दूत्या साकमेव नमस्कृतो गुरुणा। तथा च व्याख्यातं श्रीजयरथेन टीकायाम्— 'भगवत्याख्याऽस्य दूती' इति (तं.आ. वि.ख. १, पृ. ३२)। कौलिकसाधनाभ्यासे गुरुवत्तस्य दूत्यपि हि पूजनीया भवति, यतः कौलगुरुः परात्परं तत्त्वविज्ञानं स्वदूत्यां सङ्क्रामयति, तन्मुखेन च शिष्यधिषणायाम्— इत्येषोऽस्ति नियमः।

कौलिकी ह्युपास्तिरानन्दयोगमयी। तस्यां परिमितस्यानन्दस्य चर्वणाया मार्गेणैव रहस्यमयेन प्रकारेणापरिमिते परमानन्दमये सत्ये स्वस्वरूपे प्रवेशो विधातुं शक्यते तथा यथा योगी देहस्थोऽपि शिवभावं स्वमनुभवञ्जयति। परं रहस्यमयोऽयं योगसाधनप्रकारो नैव सुतरां स्पष्टतां नीयते। कदाचिदनधिकारिणस्तज्ज्ञात्वोभयभ्रष्टा मा भवेयुरिति।

एवंविधस्योत्कृष्टतरस्य शैवयोगाभ्यासस्य गोपनीयतामेव व्यञ्जयितुमाचार्याभिनवगुप्तमहादेयेनोक्तं क्वापि ग्रन्थान्तरप्रकरणविशेषान्ते श्रीशम्भुनाथमेव स्मरता—

इत्यागमं सकलशास्त्रमहानिधानाच्छ्रीशम्भुनाथवदनादधिगम्य सम्यक्।
शास्त्रे रहस्यरससन्ततिसुन्दरेऽस्मिन् गम्भीरवाचि रचिता विवृतिर्मयेयम्।।
इति। (तं.आ.वि.ख. १, पृ. ३२)

आचार्याभिनवगुप्तस्यानेके पूज्या गुरवोऽभवन्। परमतितरां समादरस्तेन श्रीशम्भुनाथं प्रत्येव प्रकटितस्तन्त्रालोके। किञ्चासौ श्रीशम्भुनाथस्तेन त्रिकसाधनासु कौलिकसाधनास्वप्युभयत्र सिद्धहस्तत्वेन ज्ञानविज्ञानप्रदत्तेन च स्मृतोऽनेकत्र तन्त्रालोके यथा तथाग्रे समुदाहरिष्यतेऽत्रैव निबन्धे।

अथ कोऽयं श्रीशम्भुनाथः, कुत्रत्योऽयम्, कां च शैवदर्शनपरम्परां सेवमानोऽभवदित्येषु विषयेषु यद्यपि परिपूर्णसन्तोषप्रदाः साख्यो वाङ्मयेनैव लभ्यास्तथापि या या लभ्यास्ता अनुसृत्यास्य मानवजीवनसाधनाभ्यासशास्त्रनिर्माणादिविषये किमपि सत्यमितिहासतत्त्वमत्र लिख्यते।

सिद्धजनैः प्रवर्तिता अभवँस्तावच्छैव-शाक्त-साधनाभ्यासस्य चतस्रो मठिकाः। तासु पूर्वस्यां दिशि कामरूपदेशेऽभवत् कामाख्यापीठनाम्नी मठिका सुप्रसिद्धा। दक्षिणभारते पूर्णगिरिपीठेऽभवदपरा मठिका पूर्णपीठनाम्नी। पश्चिमस्यां च दिशि जालन्धरपीठनाम्नी मठिकाभूज् जालन्धरविषये वर्तमाने काङ्गडापत्तने, हिमाचलप्रदेशे। एतत्पीठत्रिकोणमध्यबिन्दुतया व्यराजतोडियानपीठनाम्नी मठिका वर्तमानजगन्नाथपुरीनगरे। एताश्चतस्रो मठिकाः शाक्तपीठचतुष्टयत्वेन पूज्याः सन्तीदानीमपि शाक्तसम्प्रदाये।

भगवत्याः पराशक्तेरुपासकाः पूजारम्भे पीठानामेतेषां पूर्णमभिधानमनुच्चरन्तः "का-पू-जा-ओ इति पीठचतुष्टयाय नमः" इत्येव भाषन्ते। केन्द्रभूते शाक्तपीठे यद्यप्यद्यत्वे वैष्णवानामधिकारस्तथापि तत्रत्यं वातावरणमागमिकमेव न वैदिकं न

चापि स्मार्त्तम्। प्रस्तरकलापि तत्र तान्त्रिकी, न वैष्णवीति सूक्ष्मतरावलोकनेन स्पष्टतां यातीत्यलमप्रकृतेन।

प्रकृतं चैतत्— पूर्णगिरिपीठाधीश्वरोऽभवच्छ्रीसुमतिनाथः शैव-शाक्तोपास्ति-परम्परागुरुः। तस्य शिष्योऽभवच्छ्रीशम्भुनाथः। असौ शम्भुनाथः शैवशाक्तोपास्ति-रहस्यवित्त्वेन जालन्धरपीठाधीशेन स्वकीये पीठे निजोत्तराधिकारित्वेन वृतः सन् यथाकालं जालन्धरपीठाधीशत्वमवाप, चिरं च तत्पदकर्तव्यं प्रपालयन् शैवशाक्तोपासननिरतानां साधकानां पथप्रदर्शकत्वं निर्वहन् महतीं कीर्तिमलभत चतसृष्वपि दिक्षु।

सुचिरकालं जालन्धरपीठाधीश्वरत्वं निभालयन् शिवशक्त्युपासकानां कृते सत्सन्तोषप्रदगुरुत्वेन महतीं कीर्तिमलभत दिक्चतुष्टयव्यापिनीम्। समुद्धृतमेतद्विषये कुतश्चित् पद्यमेकं जयरथेन तन्त्रालोकटीकां निर्मिमानेन, तद्यथा—

कश्चिद् दक्षिणभूमिपीठवसतिः श्रीमान् विभुर्भैरवः
पञ्चस्रोतसि सातिमार्गविभवे शास्त्रे विधाता च यः।
लोकेऽभूत् सुमतिस्ततः समुदभूत्तस्यैव शिष्याग्रणीः
श्रीमान् शम्भुरिति प्रसिद्धिमगमज्जालन्धरात् पीठतः।। इति।

(तं.आ.वि.ख. १, पृ. २३६)

यच्च—'श्रीसोमतः सकलवित् किल शम्भुनाथः' इति। (तं.आ. ३७।६१)

इत्युक्तम्, तस्याभिप्रायोऽयमेवापाततो यज्जालन्धरपीठाधीश्वरोऽभवत् कश्चन श्रीसोमनाथो, यस्योत्तराधिकारितां श्रीशम्भुनाथोऽधिगतवानिति। तत्र व्याख्याने रहस्यात्मके उमाख्यया दूत्या सहितः श्रीमान् सोमः, तस्मात् प्राप्ताधिकारः श्रीशम्भुनाथ[१] इत्येष वार्थः।

अथ कोऽयं श्रीशम्भुनाथ इति विषये उच्यते—

अयं शैवशाक्तमहागुरुः समस्तागमिकसाधनाक्रमोपास्तिनिष्णातः, सुमहान् योगीश्वरः। एतस्य महामहिमत्वेन विद्वांसो, योगिनः, तपस्विनः, आगमगुरवः, शैवशाक्तोपास्तिमर्मज्ञा सिद्धपुरुषा नैवास्य वास्तविकं नाम प्रायश उच्चरन्ति स्म।

ततः 'श्रीशम्भुनाथ' इति पदस्य स्थाने ते 'श्रीसिद्धनाथ' इत्येव वदन्ति स्म।

१. अत्र जयरथकृता व्याख्या नैव समीचीना प्रतिभाति, यतः श्रीशम्भुनाथस्य श्रीसुमति-नाथशिष्यत्वमनेकत्रोक्तम्।

अद्यत्वेऽपि परमास्तिका भक्तजना गुरोर्नाम नोच्चरन्ति प्रायशः। ततः प्राक्तने काले विद्वांसः शास्त्रकृतो व्याख्यातारश्च शास्त्राणां श्रीशम्भुनाथं श्रीसिद्धनाथ इत्येव वदन्ति स्म। स्पष्टीकृतोऽयं विषयः शाङ्करपरम्परायामधिकारभारमुद्वहता श्रीपृथ्वीधराचार्येण स्वकीयस्य भुवनेश्वरीस्तोत्रस्य चरमभागे। तद्यथा—

श्रीसिद्धनाथ इति कोऽपि युगे चतुर्थे
प्रादुर्बभूव करुणावरुणालयेऽस्मिन्।
श्रीशम्भुरित्यभिधया स मयि प्रसन्नं
चेतश्चकार सकलागमचक्रवर्ती।। इति। (भु.स्तो. ३७)

स्तोत्रस्यान्तेऽपि सिद्धमेनं नामद्वयेन कीर्तितवान्। तद्यथा—

हे सिद्धनाथ करुणाकर शम्भुनाथ।
हे शम्भुनाथ करुणाकर सिद्धनाथ।। इति। (मु.स्तो. ३८)

अनेन सिद्धनाथेति नाम्ना समुल्लिखितेन श्रीशम्भुनाथभट्टारकेण ये ग्रन्था निर्मिता अभूवँस्तेषु प्रसिद्धतमस्तावत् क्रमस्तोत्राख्यः कालीदेवीस्तवः। तस्य स्तवस्य केवलं चतुर्दश एव पद्यान्यद्यत्वे समुपलभ्यन्ते। तानि तावज्जयरथेन स्वकीये तन्त्रालोकोपरि विरचिते विवेकाख्ये भाष्ये द्वादशकालीनिरूपणप्रसङ्गे समुद्धृतानि सम्पूर्णस्य क्रमस्तोत्रस्योपरि या विस्तृता टीका क्रमकेलिनाम्नी निर्मिताऽभूदाचार्याभिनवगुप्तमहोदयैः, सा नैवाधुना क्वापि लभ्येति महतो खेदस्य विषयोऽयम्।

एतस्य क्रमस्तोत्रस्य प्रशंसापर उल्लेखः कृतोऽस्ति चिद्गगनचन्द्रिकाख्ये सुमधुरे दर्शनतत्त्वगर्भे स्तोत्रकाव्ये कोकिलकण्ठेन भक्तकविना श्रीवत्साख्येन[१]। तद्यथा—

सिद्धनाथकृततत्क्रमस्तुतिं कालिदासरचितां च पञ्चिकाम्।
यद्विनिश्चितपदं च ते स्तवं योऽम्ब वेद कुरु तद्वशं जगत्[२]।। इति।

---

१. कविरयं श्रीवत्सनामा सन् भ्रान्तदृष्टिभिः सम्पादकैः कालिदास इति नामकोऽयमिति जोघुष्टम्। यद्यपि स्तोत्रस्यान्ते स्पष्टमुक्तं कविवरेण— 'श्रीवत्सो विदधे स तु' इति। ततः पूर्वं कविना एवं स्तुतम्— (हे) 'कालि! दासपदवीं तवाश्रितः' एतैः पदैर्भ्रान्तबुद्धयः सम्पादकाः प्रकाशकाश्च श्रीवत्सं कविं कालदासेति नाम्ना घोषितवन्तः। अद्यापीयं भ्रान्तिः प्रचलत्येव विद्वत्समाजे। स एष महतो खेदस्य विषयः।

२. मुद्रितग्रन्थपाठो बहुधाऽशुद्ध इति विमृशन्तु विद्वांसः। सटीकोऽपि मुद्रितः पाठस्तथाविध एव।

एतदनुमातुं शक्यते यच्छ्रीशम्भुनाथेनानेके ग्रन्था निर्मिता अभूवन्, य इदानीं नैव लभ्याः। तेभ्यः समुद्धृतानामुद्धरणानां नास्त्यभावो यतस्तत एव स्पन्दप्रदीपिकायामुक्तमुत्पलवैष्णवेन दर्शनगुरुणा—

प्रोक्तमेतत् सिद्धनाथेनाभेदार्थकारिकासु—

वस्तुनो भावशून्यस्य त्वग्राह्यस्य निराकृतेः।
कल्पनामात्रमेवैतद् यच्छिवव्यपदेशनम्।।
नेत्थं विभोर्विवर्तोऽस्ति परिणामश्च न क्वचित्।
अथवा द्वयमप्यस्तु तथाप्यस्य न खण्डना।। इति। (स्पं.प्र., पृ. ४)

एषा श्रीशम्भुनाथेन रचिता अभेदार्थकारिका नैव क्वापि लभ्येदानीम्। समस्तशास्त्रतत्त्वविज्ञानभाजो बहुविधशास्त्रव्याख्यानकृतश्चास्यापूर्वस्य दर्शनशास्त्र-गुरोरेवंविधेन सुमहता माहात्म्येन दर्शनशास्त्रोपासकाः शास्त्ररसरसिकाश्च सज्जना एनं महागुरुमनेकैर्नामभिर्वदन्ति स्मेति निर्दिष्टं तन्त्रालोकविवेके श्रीजयरथेन। यथा—

भट्टं भट्टारिकानाथं श्रीकण्ठं दृष्टभैरवम्।
भूतिश्रिया कलायुक्तं नृसिंहं वीरमुत्कटम्।।
नानाभिधानमाद्यन्तं वन्दे शम्भुं महागुरुम्।।
(त.आ.वि.ख. १, पृ. ३४)

एतत् पद्यमभिनवगुप्तकृतमेवेति निर्दिष्टं तत्र। एवंविधैर्नानाभिधानैः प्रसिद्धत्वं महागुरोः श्रीशम्भुनाथस्यातीवविद्वत्प्रियत्वं व्यनक्ति।

शैवदर्शनस्यासन् चतस्रो मठिकाः। तासु तिस्रः कश्मीरेष्वेव विकासमुपयाताः। ता आनर्दमठिका, श्रीनाथमठिका, त्र्यम्बकमठिका चेति। एताश्च क्रमेण द्वैतदृष्ट्या, द्वैताद्वैतदृष्ट्या, अद्वैतदृष्ट्या च शैवीमुपासनां प्राचारयामासुः। त्र्यम्बकादित्येन गुरुणा स्वपुत्रद्वारा प्रचारितोपर्युक्ता त्र्यम्बकमठिका।

एतस्यामेव मठिकायां महान्तो गुरवो शास्त्रोपदेश-ग्रन्थनिर्माणादिकार्याणि कृतवन्तः। तेषु वसुगुप्तः, भट्टकल्लटः, सोमानन्दः, उत्पलदेवः, अभिनवगुप्तश्चेति पञ्च सुप्रसिद्धा महागुरवः। त्र्यम्बकादित्येन गुरुणा स्वकन्याया मुखेनापरापि मठिका प्रचारिताऽभूद् या तावद् अर्धत्र्यम्बकमठिकेति प्रसिद्धा। एषैव मठिका जालन्धरपीठे

(कांगडायाम्) सुप्रतिष्ठिताऽभवत्। एतस्या एव मठिकायाः सुमहान् गुरुः श्रीशम्भुनाथोऽभवद्। स च त्रिकक्रमे कौलक्रमे चोभयत्र सिद्धहस्तो गुरुरासीत्।

आचार्याभिनवगुप्तस्य बुद्धौ ये केऽपि संशयाः शिष्टा आसन् कौलक्रमविषये त्रिकयोगविषये वा, तेषां निवारणं श्रीशम्भुनाथेनैव कृतम्। तत एव श्रीतन्त्रालोकेऽनेकत्र श्रीमदभिनवगुप्तपादाः श्रीशम्भुनाथमेवाधिकारवत्तया स्मृतवन्तस्तत्र तत्र गहनगहनानां योगादिसाधनाविषयाणां निरूपणप्रसङ्गे।

श्रीक्रमस्तोत्रे याः शाक्तोपायप्रक्रियाः सङ्केतमात्रेण प्रतिपादितास्तासामुल्लेखः पूर्वमेव कृतोऽभवच्छ्रीशिवानन्दनाथेन, द्वादशकाल्युपासनागुरुणा श्रीकालिकास्तोत्रे। सैवोपासना विस्तरतः काव्यात्मकेन माध्यमेन प्रतिपादिता चिद्गगनचन्द्रिकायामपि महाकविना कालीयोगसाधनागुरुणा श्रीवत्सेनापि। एते सिद्धगुरवः सर्वत्र भारते क्वचित् क्वचिदाविर्भूताः सन्तः शैवशाक्तोपास्तिक्रममुपदिष्टवन्तस्तत्तत्काले। तेषामेव महागुरूणां मध्ये महामहिममण्डितः श्रीशम्भुनाथ आचार्याभिनवगुप्ताय सर्वशास्त्ररहस्यभूतान् विषयान् व्याख्यातवान्।

अथैतदनुमातुं शक्यते यदाचार्यमहोदयाः कञ्चित् कालं जालन्धरपीठे निवसन्तः श्रीशम्भुनाथमहोदयानां पूजां च कुर्वाणांस्तेषां मुखारविन्दादागमिक-योगसाधनारहस्यानि क्रियाकलापरहस्यानि च श्रुतवन्त इति। तत एव च ते तन्त्रालोकाख्यं शास्त्रं गूढतरशास्त्ररहस्यस्पष्टीकरणसाधनाभूतमपूर्वं दर्शनसिद्धान्त-साधनाक्रमक्रियाकलापादिप्रतिपादकं सर्वस्मिन्नपि जगत्यनुपमं, धर्मदर्शन-योगोपासनाकर्मादिस्पष्टीकरणक्षमं शास्त्ररत्नं सुनिर्मातुं सुसमर्थतामाप्तवन्तः सन्तः सर्वत्र ग्रन्थकारगुरुसमाजात्मकतारामण्डले चन्द्रवत् प्रकाशमानाः, सूर्यवच्च समस्तं दार्शनिकविषयजातं प्रकाशयन्तो व्यराजन्तेति।

तन्त्रालोकेऽनेकेषु स्थलेषु स्वमतस्य याथार्थ्यं स्थापयितुं तत्र तत्र श्रीशम्भुनाथसम्मतत्वं तदुपदिष्टत्वं च प्रतिपादितं सुस्पष्टैः शब्दैराचार्या-भिनवगुप्तमहोदयैः। तदुदाहरणानि यथा—

१. प्रथमतस्तदिच्छोपायापरपर्यायभूतस्य शाम्भवोपायस्य यद्रहस्यं तस्य प्रकाशन-मधिकृत्य महागुरुभिः श्रीशम्भुनाथोपदिष्टत्वमेव स्पष्टतयोक्तम्। तद्यथा—

एवं परेच्छा-शक्त्यंश-सदुपायमिमं विदुः।
शाम्भवाख्यं समावेशं सुमत्यन्तेनिवासिनः।। इति।

(तं.आ. १।२१३)

२. त्रिकयोगत्रयान्तर्गतस्य विशिष्टस्य शैवस्य ध्याननाम्नो योगस्य विषये, यथा—

इत्येतत्प्रथमोपायरूपं ध्यानं न्यरूपयत्।
श्रीशम्भुनाथो मे तुष्टस्तस्मै श्रीसुमतिः प्रभुः।। इति। (तदेव, ५।४१)

३. जगदानन्दविषये, यथा—

यत्र कोऽपि व्यवच्छेदो नास्ति यद् विश्वतः स्फुरत्।
यदनाहतसंवित्तिपरमामृतबृंहितम्।।
यत्रास्ति भावनादीनां न मुख्या कापि सङ्गतिः।
तदेव जगदानन्दमस्मभ्यं शम्भुरूचिवान्।। इति।
(तदेव, ५।५०-५२)

४. कालाध्वविषये आध्यात्मिक-विषुवत्काल-स्वरूपनिर्णये, यथा—

श्रीत्रैयम्बकसन्तानविततताम्बरभास्करः।
दिनरात्रिक्रमं मे श्रीशम्भुरित्थमपप्रथत्।। (तं.आ. ६।८८-८९)

५. स्थूलवर्णोदयविषये, यथा—

अथ स्थूलोदयोऽर्णानां भण्यते गुरुणोदितः। इति (तदेव ५।२४०)

६. देशाध्वोपासनविषये, यथा—

इति देशाध्वविभागः कथितः श्रीशम्भुना समादिष्टः। (तदेव, ८।४५२)

७. कर्मेन्द्रियाणीति विषये भट्टजयन्तमतनिरसनानन्तरम्। यथा—

उच्यते श्रीमतादिष्टं शम्भुनात्र ममोत्तरम्।
स्वच्छसंवेदनोदारवित्कलाप्रबलीकृतम्।। इति। (तदेव, १।२६१)

८. जाग्रदाद्यवस्थाचतुष्टयनिरूपणे, यथा—

इति श्रीसुमतिप्रज्ञाचन्द्रिकापास्ततामसः।
श्रीशम्भुनाथः सद्भावं जाग्रदादौ न्यरूपयत्।। (तदेव, १०।२८७)

९. पुनस्तत्रैव विषये सविस्तरं वर्णितम्। (तदेव, १०।२९४-३००)

१०. मृतशिष्योद्धारार्थं मन्त्रजालप्रयोगदीक्षाविषये। (तदेव, १०।२२१-२२६)

११. सप्रत्ययाया दीक्षाया विषये। (तदेव, २९।२१२)

१२. चक्रयागनिरूपणावसरे। (तदेव, २९।२४३-२५२)

१३. शास्त्राणां पारस्परिकसामञ्जस्यविषये। (तदेव, २९।३५-४४)

एतैरुद्धरणैरिदं स्पष्टीकृतं भवति यच्छ्रीशम्भुनाथो ज्ञानक्रियोभयपक्षे सर्वशास्त्रवित् समस्ततान्त्रिकागमिकविज्ञानतत्त्वविच्च गुरुरभवत्, कौलिकसाधनाक्रमेषु सुनिष्णातोऽप्यसौ त्रिकसाधनाक्रमज्ञानविज्ञानपारगोऽभूत्। तत एव चाचार्याभिनवगुप्तपादा महागुरुमेनं 'त्रिकार्थाम्भोधिचन्द्रमाः' इति प्रशस्तवन्तः। केऽप्यपरेऽपि त्रिकसाधनाविषयाः श्रीशम्भुनाथमुखादेव विज्ञाता आचार्याभिनवगुप्तमहोदयैः।

तद् यथोक्तं तन्त्रसारस्यान्ते—

इत्थं षडर्धक्रमसम्प्रदायं सप्रत्ययाप्रत्ययभिन्नमाप्या।
श्रीशम्भुनाथात् करुणारसेन स्वयं प्रसन्नादनपेक्षवृत्त्या।।

काश्मीरिकोऽभिनवगुप्तपदाभिधानः श्रीतन्त्रसारमकरोद् ऋजुना क्रमेणेति। (तं.सं., पृ. २०७)

परात्रींशिकाविवरणान्ते[१] चापि, यथा—

परमेश्वरः प्रपन्न-प्रोद्धरण-कृदा-प्रयुक्त-गुरुहृदयः।
श्रीमान् देवःशम्भु[२]र्मामियति नियुक्तवांस्तत्त्वे।। (प.त्री.वि., पृ. २८२)

आश्चर्यं महदाश्चर्यं यदीदृशं सर्वोत्तमं ज्ञान-विज्ञानगुरुं श्रीशम्भुनाथं विरल-विरला एव विद्वांसो जानन्तीति। ततोऽपि महदाश्चर्यं यत्तेनाधिष्ठिते जालन्धरपीठेऽधुना तस्य नामापि न केनचिदपि विदुषा ज्ञायत इति। कलिकालविजृम्भितमेतज्जानन्तु सहृदया विद्वज्जना इति विरम्यतेऽधिकतराद् विस्तरात्।

●

१. अद्यत्वे सर्वे ग्रन्थमिमं परात्रिंशिकेति वदन्ति, यद्यप्याचार्याभिनवगुप्तेन स्वकृते विवरणेऽस्य ग्रन्थरत्नस्य यथार्थमभिधानं 'परात्रींशिकेति' व्याख्यातं सुस्पष्टम्।

२. शम्भुरत्र शिवोऽपि श्रीशम्भुनाथोऽपि तन्त्रयुक्त्या।।